**दिनाङ्क :-20.03.2024**
**प्रात: - 06:55**

## स्टार्टअप-महाकुम्भ:

प्रधानमन्त्री नरेन्द्रमोदी अद्य भारत-मण्डपम इत्यत्र स्टार्टअप-महाकुम्भं सम्बोधयिष्यति। एकस्मिन् सामाजिकान्तर्जाल सन्देश माध्यमेन श्रीमोदिना उक्तं यत्, एषः एकः मञ्चः अस्ति यः स्टार्टअप-जगतः हितधारकान्, नवीकरिणः, भवि-उद्यमिनां च एकत्रितं करोति। सः अवदत् यत्, स्टार्टअप-जगति भारतस्य प्रगतिः विगतेषु वर्षेषु अद्भुता अस्ति। सोमवासरे आरब्धस्य त्रिदिवसीयस्य अस्य आयोजनस्य अद्य अन्तिम: दिवस: यास्यति। अस्मिन् आयोजने विभिन्न-स्टार्टअप-इति नवोद्योगानां विभिन्न-मण्डपा: सन्ति। येषु ए.आई., बीटूबी, एग्रीटेक, डीपटेक, क्लाईमेट टेक्, गेमिंग, ई-स्पोर्टस, फिटनेस सदृशा: नैके मण्डपा: सम्मेलिता: सन्ति। अस्य महाकुम्भस्य उद्देश्यं धनपतिनां निवेशकानां च भारतीय-व्यापारेण सह संयोजनम् अस्ति।

## प्रधानमंत्री-भूटान यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः आरभ्य भूटानस्य द्विदिवसीय-राजकीय-यात्रायां भविष्यति। यात्रावधौ प्रधानमन्त्री भूटानदेशस्य राज्ञा जिग्मे-खेसर-नामग्याल वाङ्गचुक् इत्यनेन, भूटानस्य चतुर्थराज्ञा जिग्मे सिङ्ग्ये वाङ्गचुक इत्यनेन सहापि मेलनं करिष्यति। सः भूटानदेशस्य समकक्षेण शेरिंग-टोब्गे इत्यनेन सह अपि वार्तालापं करिष्यति। विदेशमन्त्रालयेन उक्तं यत्, भारतस्य भूटानस्य च नियमितरूपेण उच्चस्तरीयस्य आदानप्रदानस्य परम्परायाः अनुरूपं तथा च सर्वकारस्य नेबरहुड् फर्स्ट् इत्यस्मिन् नीतेः उपरि यात्रा भवति। अपि च उक्तं यत्, भारत-भूटानयोः मध्ये अद्वितीयं स्थायित्वं सहयोगत्वं चास्ति यो हि पारस्परिकविश्वासे, अवगमने, सद्भावनायां च आधारितम् अस्ति। विदेशमंत्रालयेन उक्तं यत् एषा यात्रा उभयोः पक्षयोः द्विपक्षीयक्षेत्रीयविषयेषु विचारविनिमयस्य अवसरं प्रदास्यति, उभयोः देशयोः जनानां हिताय अनुकरणीयसहयोगं विस्ताराय तीव्रीकरणाय च उपायानां विषये अवसरं प्रदास्यति।

## सर्वोच्चन्यायालय:/सीएए

सर्वोच्चन्यायालयेन ह्य: नागरिकतासंशोधनाधिनियमस्य, सीएए इत्यस्य कार्यान्वयनावरोधनम् अस्वीकृतम्। गतसप्ताहे अधिसूचिताधिनियमस्य समाह्वाने सप्त-त्रिंशत्यधिक द्विशतं यावत् याचिकासु प्रतिक्रियां प्रददता सर्वोच्चन्यायालयेन सर्वकाराय सप्ताहत्रयं अपि प्रदत्तम्। मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडः, न्यायाधीशः जे.बी.परदीवाला, न्यायाधीशः मनोजमिश्रः च अस्य विषयस्य श्रवणं कृतवन्तः।

याचिकाकर्तासु इण्डियन-यूनियन-मुस्लिमलीगः, काङ्ग्रेसस्य विपक्षीदलस्य च नेता जयराम रमेशः, तृणमूलकाङ्ग्रेस दलस्य महुआ मोइत्रः च आसन् । अस्मिन् प्रकरणे अग्रिमः कार्याचरणं एप्रिल-मासस्य नवमे दिनाङ्के निर्धारितम् अस्ति।

## केरल-प्रधानमन्त्री

भाजपाया: वरिष्ठ-नेतृभि: नरेन्द्रमोदिना च ह्य: राष्ट्रिय-जनतान्त्रिक-गठबन्धनस्य प्रत्याशिनां समर्थने केरलस्य पलक्कड़-स्थले पथप्रदर्शनं विहितम्। लोकसभानिर्वाचनस्य घोषणाया: अनन्तरं श्रीमोदिन: इदं प्रथमं पथप्रदर्शनम् अस्ति। अस्मिन् पथप्रदर्शने भारतीयजनतापार्टीति-दलस्य केरलक्षेत्रस्य-अध्यक्षेण के.सुरेन्द्रन इत्यनेन एवं पलक्कड़-पोन्नानी-संसदीयक्षेत्रेभ्य: एनडीए-प्रत्याशिभि: अपि भागं स्वीकृतम्। पथप्रदर्शनानन्तरं श्रीमोदिना तमिलनाडु-राज्यस्य सलेमस्थले एकाजनसभा अपि सम्बोधिता। तेनोदीरितं यत् पी.एम.के. इत्यनेन सह सन्धिं कृत्वा एनडीए-इत्यनेन नवोर्जा सम्प्राप्ता।

## स्विस ओपन बैडमिन्टन:

स्विस-ओपन-सुपर-३००-बैडमिण्टन् प्रतियोगितायाः चतुर्विंशत्यधिक-द्विसहस्रतम-वर्षस्य संस्करणस्य आरम्भः स्विट्ज़रलैण्ड्देशस्य बेसेल्-नगरे अभवत्। पुरुष-एकलविभागे भारतस्य लक्ष्यसेनः, किदाम्बी श्रीकान्तः, प्रियांशु राजावत: अपि च के-जॉर्ज स्वीय द्वात्रिंशत् चक्रात्मकस्य क्रीडनम् करिष्यन्ति। महिला एकलस्पर्धायां चतुर्थस्थानस्य पी वी सिन्धुः द्वात्रिंशत्तमे चक्रे जर्मनीदेशस्य यवोन्-ली इत्यनया सह अद्यः स्पर्धिष्यति।

**।। इति वार्ता: ।।**